दिनाङ्क :-18.02.2025

प्रात: - 06:55

<u>प्रधानमन्त्री/कतर</u>

कतर-देशस्य अमीर इति पदासीन: शेख-तमीम बिन हमद अल-थानि इत्येष: द्वयो: दिनयो: आधिकारिकयात्रायाम् ह्यः नवदिल्लीं प्राप्तवान्। तेन सह मन्त्रिण: वरिष्ठाधिकारिण: व्यापारप्रतिनिधिमण्डलं च समेत्य उच्च-स्तरीय-प्रतिनिधिमण्डलम् अपि सन्ति। प्रधानमन्त्री नरेन्द्रमोदी विमानपत्तनस्थानके शेख तमीम बिन हमद अल-थानी इत्यस्य स्वागतम् अकरोत्। राष्ट्रपतिभवनस्य प्राङ्गणे शेख तमीम बिन हमद अल-थानी इत्यस्य औपचारिकं स्वागतम् भविष्यति। यात्राकाले अमीर इति कतरस्य राष्ट्रप्रमुख: राष्ट्रपतिना द्रौपदी मुर्मु इत्यनया सह चर्चां करिष्यति, या हि तस्य सम्मानार्थं भोजनस्य अपि आयोजनं करिष्यति। तदनु प्रधानमन्त्रिणा नरेन्द्रमोदिना सह द्वैपाक्षिकसम्बन्धानां विभिन्नेषु विषयेषु वार्तालापं करिष्यति। कतर-देशस्य अमीर इत्येतस्य यात्रायाः समये व्यापारः, निवेशः, ऊर्जा, प्रौद्योगिक-सहकारः च प्रमुखा: विषया: भविष्यति। भारत-कतर-देशयोः दृढम् आर्थिकसहभागित्वम् अस्ति, द्वैपाक्षिकव्यापारः विविधक्षेत्रेषु विस्तृत: अस्ति।

<u>मुख्य निर्वाचनयुक्त:</u>

निर्वाचनायुक्त: ज्ञानेशकुमार: नवीन: मुख्यनिर्वाचनायुक्तत्वेन नियुक्तो जात: यतो हि वर्तमानस्य निर्वाचनायुक्तस्य राजीवकुमारस्य कार्यकाल: अद्य समाप्यते। निर्वाचनायुक्त: ज्ञानेशकुमार: केरल-प्रभागस्य अष्टाशीत्यधिक-नवदश शततमवर्षस्य समूहस्य पूर्व-प्रशासनिकासेवाया: अधिकारी वर्तते। असौ संसदीय-विषयाणां मन्त्रालये सचिवपदम् अलङ्कृतवान्। अपरत्र डॉ विवेकजोशी नूतन: निर्वाचनायुक्त: नियुक्त: असौ हरियाणाप्रभागस्य नवाशीत्यधिक-नवदशशततमवर्षस्य समूहस्य भारतीय-प्रशासनिक सेवाया: अधिकारी वर्तते। राष्ट्रपति: द्रौपदीमुर्मु: उभयो: आयुक्तयो: नियुक्तिं कृतवती।

<u>अमितशाह:</u>

केन्द्रीयगृहमन्त्री अमितशाह: अद्य जम्मू-कश्मीरराज्ये नवीनपराधिक- विधीनां कार्यान्वयनस्य स्थितौ मुख्यमन्त्रिणा उमर-अब्दुल्ला इत्यमुना तथा च उपराज्यपालेन मनोजसिन्हा-इत्येतेन सह समीक्षोपवेशनमेकं विधास्यति। एतस्मिन् उपवेशने आरक्षि-कारावास-न्यायालय-अभियोजन-इत्यादिनां विभिन्न-प्रावधानानां वर्तमान-स्थितौ चर्चा विधास्यते ये त्रिषु नवीनेषु आपराधिक-विधिषु उल्लिखिता: वर्तन्ते- एते त्रयोविंशत्यधिकद्विसहस्रतमवर्षस्य भारतीयन्यायसंहिता भारतीय-नागरिक-सुरक्षा-संहिता भारतीय-साक्ष्याधिनियमा: सन्तीति। एते विधय: क्रमश: भारतीय-दण्ड-संहिता दण्ड-प्रक्रिया-संहिता

भारतीय- साक्ष्य-अधिनियमानां स्थाने समागता:। समायोक्ष्यमाणे एतस्मिन् उपवेशने केन्द्रीय- गृहसचिव: जम्मू-कश्मीरस्य मुख्यसचिव: राज्यस्य आरक्षि-महानिदेशक: इत्यादय: उपस्थिता: भविष्यन्ति।

<u>महाकुम्भ:-काशीतमिलसङ्गमम्</u>

प्रयागराजे महाकुम्भे काशी-तमिल-सङ्गमम् इत्येतस्य तृतीयसंस्करणस्य द्विशतसङ्ख्यका: प्रतिनिधय: पुण्ये सङ्गमे पवित्रावगाहनं कृतवन्त: समूहोऽयं वाराणसीत: प्रयागराजं गतवान्। काशी तमिल-सङ्गमम् इत्येतस्य उद्देश्यं तमिलनाडु-काशी-नगरयो: मध्ये प्रचीनसभ्यतागत-बन्धनस्य उत्सवस्य संवर्धनमिति विद्यते। डिजिटल-कुम्भ-प्रदर्शन्या: अवलोकनान्तरं औद्घाटनिकसमूह: एष: अयोध्यानगरी प्रति गतवान्।

<u>क्रिकेट्-प्रतिस्पर्धा</u>

वुमेन्स-प्रीमीयर-लीग-इत्येतस्यां क्रिकेट-प्रतिस्पर्धायां रॉयल-चैलेन्जर्स- बेंगलुरू इत्यनेन दलेन डेल्हीकैपिटल्स-दलं ह्य: रात्रौ वडोदराया: कोटाम्बी क्रीडाङ्गणे अष्टक्रीडकै: पराजितम्। अद्य गुजरात-जायन्ट्स दलस्य सामुख्यं मुम्बई-इन्डियन्सदलेन साकं भविष्यति। अस्या: स्पर्धाया: प्रसारणं रात्रौ सार्ध-सप्तवादने भविष्यति।